# શ્રીકાલિકાષ્ટકમ્

shrIkAlikAShTakam

sanskritdocuments.org

October 6, 2018

# shrIkAlikAShTakam

# શ્રીકાલિકાષ્ટકમ્

## Sanskrit Document Information

Text title : kAlikAShTakam

File name : kAlikAShTakam.itx

Category : aShTaka, devii, dashamahAvidyA, shankarAchArya, devI

Location : doc_devii

Author : Shankaracharya

Description-comments : This is also said to be from Kalirahasya

Latest update : June 30, 2017

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

October 6, 2018

*sanskritdocuments.org*

# શ્રીકાલિકાષ્ટકમ્

ધ્યાનમ્ ।

ગલદ્રક્તમુણ્ડાવલીકણ્ઠમાલા
મહોઘોરરાવા સુદંષ્ટ્રા કરાલા ।
વિવસ્ત્રા શ્મશાનાલયા મુક્તકેશી
મહાકાલકામાકુલા કાલિકેયમ્ ॥ ૧॥

ભુજેવામયુગ્મે શિરોઽસિં દધાના
વરં દક્ષયુગ્મેઽભયં વૈ તથૈવ ।
સુમધ્યાઽપિ તુઙ્ગસ્તના ભારનમ્રા
લસદ્રક્તસૃક્કદ્વયા સુસ્મિતાસ્યા ॥ ૨॥

શવદ્વન્દ્વકર્ણાવતંસા સુકેશી
લસત્પ્રેતપાણિં પ્રયુક્તૈકકાઞ્ચી ।
શવાકારમઞ્ચાધિરૂઢા શિવાભિશ્-
ચતુર્દિક્ષુશબ્દાયમાનાઽભિરેજે ॥ ૩॥

॥ અથ સ્તુતિઃ ॥

વિરઞ્ચ્યાદિદેવાસ્ત્રયસ્તે ગુણાસ્ત્રીન્
સમારાધ્ય કાલીં પ્રધાના બભૂબુઃ ।
અનાદિં સુરાદિં મખાદિં ભવાદિં
સ્વરૂપં ત્વદીયં ન વિન્દન્તિ દેવાઃ ॥ ૧॥

જગન્મોહિનીયં તુ વાગ્વાદિનીયં
સુહૃત્પોષિણીશત્રુસંહારણીયમ્ ।
વચસ્તમ્ભનીયં કિમુચ્ચાટનીયં
સ્વરૂપં ત્વદીયં ન વિન્દન્તિ દેવાઃ ॥ ૨॥

ઇયં સ્વર્ગદાત્રી પુનઃ કલ્પવલ્લી

મનોજાસ્તુ કામાન્ યથાર્થં પ્રકુર્યાત્ ।
તથા તે કૃતાર્થા ભવન્તીતિ નિત્યં
સ્વરૂપં ત્વદીયં ન વિન્દન્તિ દેવાઃ ॥ ૩॥

સુરાપાનમત્તા સુભક્તાનુરક્તા
લસત્પૂતચિત્તે સદાવિર્ભવત્તે ।
જપધ્યાનપૂજાસુધાધૌતપઙ્કા
સ્વરૂપં ત્વદીયં ન વિન્દન્તિ દેવાઃ ॥ ૪॥

ચિદાનન્દકન્દં હસન્ મન્દમન્દં
શરચ્ચન્દ્રકોટિપ્રભાપુઞ્જબિમ્બમ્ ।
મુનીનાં કવીનાં હૃદિ દ્યોતયન્તં
સ્વરૂપં ત્વદીયં ન વિન્દન્તિ દેવાઃ ॥ ૫॥

મહામેઘકાલી સુરક્તાપિ શુભ્રા
કદાચિદ્ વિચિત્રાકૃતિર્યોગમાયા ।
ન બાલા ન વૃદ્ધા ન કામાતુરાપિ
સ્વરૂપં ત્વદીયં ન વિન્દન્તિ દેવાઃ ॥ ૬॥

ક્ષમસ્વાપરાધં મહાગુપ્તભાવં
મયા લોકમધ્યે પ્રકાશિકૃતં યત્ ।
તવ ધ્યાનપૂતેન ચાપલ્યભાવાત્
સ્વરૂપં ત્વદીયં ન વિન્દન્તિ દેવાઃ ॥ ૭॥

યદિ ધ્યાનયુક્તં પઠેદ્ યો મનુષ્યસ્-
તદા સર્વલોકે વિશાલો ભવેચ્ચ ।
ગૃહે ચાષ્ટસિદ્ધિર્મૃતે ચાપિ મુક્તિઃ
સ્વરૂપં ત્વદીયં ન વિન્દન્તિ દેવાઃ ॥ ૮॥

॥ ઇતિ શ્રીમચ્છઙ્કરાચાર્યવિરચિતં શ્રીકાલિકાષ્ટકં સમ્પૂર્ણમ્ ॥

This is also said to be found in Kalirahasya text.

*shrIkAlikAShTakam*

pdf was typeset on October 6, 2018

Please send corrections to *sanskrit@cheerful.com*